# ॥श्री  रुद्र यज्ञ ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवोमहेश्वरः
गुरुः साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः ॥
ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम्
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्
एकं नित्यं विमलमचलं सर्वधि साक्षिभूतम्
भावातीतं त्रिगुणरहितं सद्गुरुं तम् नमामि ॥

ॐ चत्वारि शृंगा त्रयो अस्य पादा द्वेशीर्षे सप्त हस्ताऽसो अस्य
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याम् आविवेश ॥

## ॥शान्तिपाठ ॥

हरिः ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शꣳसिषद् विश्वेदेवाः सूक्तवाचः पृथिवी मातर्मा मा हिꣳसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोऽनुमदन्तु ॥

॥ॐ शांतिः शांतिः शांतिः ॥

ॐ नमो भगवते रुद्राय ।

॥नमकप्रश्नम् ॥

नमकम् ॥१ ॥

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः ।

नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः स्वाहा ॥१ ॥

या त इषुः शिवतमा शिवम् बभूव ते धनुः ।

शिवा शरव्या या तव तया नो रुद्र मृडय स्वाहा ॥२ ॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।

तया नस्तनुवा शन्तमया गिरिशन्ताऽभिचाकशीहि स्वाहा ॥३ ॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।

शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् स्वाहा ॥४ ॥

शिवेन वचसा त्वा गिरिशाच्छावदामसि ।

यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् स्वाहा ॥५ ॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।

अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः स्वाहा ॥६ ॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।

ये चेमाꣳ रुद्रा अभितो दिक्षु श्रिताः ।

सहस्रशोऽवैषाꣳहेड ईमहे स्वाहा ॥७ ॥

असौ योऽ वसर्पति नीलग्रीवो विलोहितः ।

उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ।

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः स्वाहा ॥८ ॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषेऽ ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः स्वाहा ॥९॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्निर्योर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप स्वाहा ॥१०॥
अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव स्वाहा ॥११॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः स्वाहा ॥१२॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज स्वाहा ॥१३॥
नमस्ते अस्त्वायुधायानातताय धृष्णवे
उभाभ्यामुत ते नमो बाहुभ्याम् तव धन्वने स्वाहा ॥१४॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मन्निधेहि तम् स्वाहा ॥१५॥

नमकम् ॥२॥
नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो स्वाहा ॥१॥
नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो स्वाहा ॥२॥
नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो स्वाहा ॥३॥
नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो स्वाहा ॥४॥
नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो स्वाहा ॥५॥

नमो भवस्य हेत्यै जगतां पतये नमो स्वाहा ॥६ ॥

नमो रुद्रायाततताविने क्षेत्राणां पतये नमो स्वाहा ॥७ ॥

नमः सूतायाहन्त्याय वनानां पतये नमो स्वाहा ॥८ ॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो स्वाहा ॥९ ॥

नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो स्वाहा ॥१० ॥

नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमो स्वाहा ॥११ ॥

नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो स्वाहा ॥१२ ॥

नमः कृत्स्नवीताय धावते सत्वनां पतये नमः स्वाहा ॥१३ ॥

नमकम् ॥३ ॥

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो स्वाहा ॥१ ॥

नमः ककुभाय निषङ्गिणेस्तेनानां पतये नमो स्वाहा ॥२ ॥

नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो स्वाहा ॥३ ॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो स्वाहा ॥४ ॥

नमो निचेरवे परिचरायारण्यानां पतये नमो स्वाहा ॥५ ॥

नमः सृकाविभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो स्वाहा ॥६ ॥

नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो स्वाहा ॥७ ॥

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो स्वाहा ॥८ ॥

नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो स्वाहा ॥९ ॥

नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो स्वाहा ॥१० ॥

नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो स्वाहा ॥११ ॥

नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो स्वाहा ॥१२ ॥

नम आसीनेभ्यः शयानेभ्यश्च वो नमो स्वाहा ॥१३ ॥

नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो स्वाहा ॥१४ ॥

नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो स्वाहा ॥१५ ॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो स्वाहा ॥१६ ॥

नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः स्वाहा ॥१७ ॥

नमकम् ॥४ ॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो स्वाहा ॥१ ॥

नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो स्वाहा ॥२ ॥

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो स्वाहा ॥३ ॥

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो स्वाहा ॥४ ॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो स्वाहा ॥५ ॥

नमो विरूपेभ्यो विश्वरुपेभ्यश्च वो नमो स्वाहा ॥६ ॥

नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो स्वाहा ॥७ ॥

नमो रथिभ्योऽरथेभ्यश्च वो नमो स्वाहा ॥८ ॥

नमो रथेभ्यो रथपतिभ्यश्च वो नमो स्वाहा ॥९ ॥

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो स्वाहा ॥१० ॥

नमः क्षतृभ्यः संग्रहीतृभ्यश्च वो नमो स्वाहा ॥११ ॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो स्वाहा ॥१२ ॥

नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो स्वाहा ॥१३ ॥

नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो स्वाहा ॥१४॥

नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो स्वाहा ॥१५॥

नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो स्वाहा ॥१६॥

नमः श्वभ्यः श्वपतिभ्यश्च वो नमः स्वाहा ॥१७॥

नमकम् ॥५॥

नमो भवाय च रुद्राय च स्वाहा ॥१॥

नमः शर्वाय च पशुपतये च स्वाहा ॥२॥

नमो नीलग्रीवाय च शितिकण्ठाय च स्वाहा ॥३॥

नमः कपर्दिने च व्युप्तकेशाय च स्वाहा ॥४॥

नमः सहस्राक्षाय च शतधन्वने च स्वाहा ॥५॥

नमो गिरिशाय च शिपिविष्टाय च स्वाहा ॥६॥

नमो मीढुष्टमाय चेषुमते च स्वाहा ॥७॥

नमो ऱ्हस्वाय च वामनाय च स्वाहा ॥८॥

नमो बृहते च वर्षीयसे च स्वाहा ॥९॥

नमो वृद्धाय च संवृध्वने च स्वाहाः ॥१०॥

नमो अग्रियाय च प्रथमाय च स्वाहा ॥११॥

नम आशवे चाजिराय च स्वाहा ॥१२॥

नमः शीघ्रियाय च शीभ्याय च स्वाहा ॥१३॥

नम ऊर्म्याय चावस्वन्याय च स्वाहा ॥१४॥

नमः स्त्रोतस्याय च द्वीप्याय च स्वाहा ॥१५॥

नमकम् ॥६ ॥

नमो ज्येष्ठाय च कनिष्ठाय च स्वाहा ॥१ ॥

नमः पूर्वजाय चापरजाय च स्वाहा ॥२ ॥

नमो मध्यमाय चापगल्भाय च स्वाहा ॥३ ॥

नमो जघन्याय च बुध्नियाय च स्वाहा ॥४ ॥

नमः सोभ्याय च प्रतिसर्याय च स्वाहा ॥५ ॥

नमो याम्याय च क्षेम्याय च स्वाहा ॥६ ॥

नम उर्वर्याय च खल्याय च स्वाहा ॥७ ॥

नमः श्लोक्याय चाऽवसान्याय च स्वाहा ॥८ ॥

नमो वन्याय च कक्ष्याय च स्वाहा ॥९ ॥

नमः श्रवाय च प्रतिश्रवाय च स्वाहा ॥१० ॥

नम आशुषेणाय चाशुरथाय च स्वाहा ॥११ ॥

नमः शूराय चावभिन्दते च स्वाहा ॥१२ ॥

नमो वर्मिणे च वरूथिने च स्वाहा ॥१३ ॥

नमो बिल्मिने च कवचिने च स्वाहा ॥१४ ॥

नमः श्रुताय च श्रुतसेनाय च स्वाहा ॥१५ ॥

नमकम् ॥७ ॥

नमो दुन्दुभ्याय चाहनन्याय च स्वाहा ॥१ ॥

नमो धृष्णवे च प्रमृशाय च स्वाहा ॥२ ॥

नमो दूताय च प्रहिताय च स्वाहा ॥३ ॥

नमो निषङ्गिणे चेषुधिमते च स्वाहा ॥४ ॥

नमस्तीक्ष्णेषवे चायुधिने च स्वाहा ॥५ ॥

नमः स्वायुधाय च सुधन्वने च स्वाहा ॥६ ॥

नमः स्रुत्याय च पथ्याय च स्वाहा ॥७ ॥

नमः काटयाय च नीप्याय च स्वाहा ॥८ ॥

नमः सूद्याय च सरस्याय च स्वाहा ॥९ ॥

नमो नाद्याय च वैशन्ताय च स्वाहा ॥१० ॥

नमः कूप्याय चावटयाय च स्वाहा ॥११ ॥

नमो वर्ष्याय चावर्ष्याय च स्वाहा ॥१२ ॥

नमो मेघ्याय च विद्युत्याय च स्वाहा ॥१३ ॥

नम ईध्रियाय चातप्याय च स्वाहा ॥१४ ॥

नमो वात्याय च रेष्मियाय च स्वाहा ॥१५ ॥

नमो वास्तव्याय च वास्तुपाय च स्वाहा ॥१६ ॥

नमकम् ॥ ८ ॥

नमः सोमाय च रुद्राय च स्वाहा ॥१ ॥

नमस्ताम्राय चारुणाय च स्वाहा ॥२ ॥

नमः शङ्गाय च पशुपतये च स्वाहा ॥३ ॥

नम उग्राय च भीमाय च स्वाहा ॥४ ॥

नमो अग्रेवधाय च दूरेवधाय च स्वाहा ॥५ ॥

नमो हन्त्रे च हनीयसे च स्वाहा ॥६ ॥

नमो वृक्षेभ्यो हरिकेशेभ्यो स्वाहा ॥७ ॥

नमस्ताराय नमः स्वाहा ॥८ ॥

नमः शंभवे च मयोभवे च स्वाहा ॥९ ॥

नमः शंकराय च मयस्कराय च स्वाहा ॥१० ॥

नमः शिवाय च शिवतराय च स्वाहा ॥११ ॥

नमस्तीर्थ्याय च कूल्याय च स्वाहा ॥१२ ॥

नमः पार्याय चावार्याय च स्वाहा ॥१३ ॥

नमः प्रतरणाय चोत्तरणाय च स्वाहा ॥१४ ॥

नम आतार्याय चालाद्याय च स्वाहा ॥१५ ॥

नमः शष्प्याय च फेन्याय च स्वाहा ॥१६ ॥

नमः सिकत्याय च प्रवाह्याय च स्वाहा ॥१७ ॥

नमकम् ॥९ ॥

नम इरिण्याय च प्रपथ्याय च स्वाहा ॥१ ॥

नमः किꣳशिलाय च क्षयणाय च स्वाहा ॥२ ॥

नमः कपर्दिने च पुलस्तये च स्वाहा ॥३ ॥

नमो गोष्ठ्याय च गृह्याय च स्वाहा ॥४ ॥

नमस्तल्प्याय च गेह्याय च स्वाहा ॥५ ॥

नमः काट्याय च गह्वरेष्ठाय च स्वाहा ॥६ ॥

नमो ह्रदय्याय च निवेष्प्याय च स्वाहा ॥७ ॥

नमः पाꣳसव्याय च रजस्याय च स्वाहा ॥८ ॥

नमः शुष्क्याय च हरित्याय च स्वाहा ॥९॥

नमो लोप्याय चोलप्याय च स्वाहा ॥१०॥

नम ऊर्व्याय च सूर्म्याय च स्वाहा ॥११॥

नमः पर्ण्याय च पर्णशद्याय च स्वाहा ॥१२॥

नमोऽपगुरमाणाय चाभिघ्नते च स्वाहा ॥१३॥

नम आक्खिदते च प्रक्खिदते च स्वाहा ॥१४॥

नमो वः किरिकेभ्यो देवाना॰ हृदयेभ्यो स्वाहा ॥१५॥

नमो विक्षीणकेभ्यो स्वाहा ॥१६॥

नमो विचिन्वत्केभ्यो स्वाहा ॥१७॥

नम आनिर्हतेभ्यो स्वाहा ॥१८॥

नम आमीवत्केभ्यः स्वाहा ॥१९॥

नमकम् ॥१०॥

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।

एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचनाममत् स्वाहा ॥१॥

या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी ।

शिवा रुद्रस्य भेषजी तया नो मृड जीवसे स्वाहा ॥२॥

इमा॰रुद्राय तवसे कर्पदिने क्षयद्वीराय प्रभरामहे मतिम् ।

यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् स्वाहा ॥३॥

मृडा नो रुद्रो तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।

यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ स्वाहा ॥४॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।

मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः स्वाहा ॥५॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते स्वाहा ॥६॥

आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु ।

रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः स्वाहा ॥७॥

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।

मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्निवपन्तु सेनाः स्वाहा ॥८॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।

अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय स्वाहा ॥९॥

मीढुष्टम् शिवतम शिवो नः सुमना भव ।

परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि स्वाहा ॥१०॥

विकिरिद विलोहित नमस्ते अस्तु भगवः ।

यास्ते सहस्रꣳहेतयोऽन्यमस्मन्निवपन्तु ताः स्वाहा ॥११॥

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।

तासामीशानो भगवः पराचीना मुखा कृधि स्वाहा ॥१२॥

नमकम् ॥११॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥१॥

अस्मिन् हत्यर्णवेऽन्तरिक्षे भवा अधि ।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥२॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥३॥

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥४॥

ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥५॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥६॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥७॥

ये पथां पथिरक्षय ऐलबृदा यव्युधः।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥८॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥९॥

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे।

तेषाꣳ सहस्रयोजनेऽवधन्वानि तन्मसि स्वाहा ॥१०॥

नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दशः प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदिचीर्दशोध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि स्वाहा ॥११॥

॥चमकप्रश्नम्॥

ॐ अग्नाविष्णू सजोषसे मा वर्धन्तु वां गिरः।द्युम्नैर्वाजेभिरागतम्॥

चमकम् ॥१॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे स्वाहा ॥१॥

चमक ॥२॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽ म्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे स्वाहा ॥२॥

चमकम् ॥३॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे स्वाहा ॥३॥

चमकम् ॥४॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे स्वाहा ॥४॥

चमकम् ॥५॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे

वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे स्वाहा ॥५॥

चमकम् ॥६॥

अग्निश्च म इंद्रश्च मे सोमश्च म इंद्रश्च मे सविता च म इंद्रश्च मे सरस्वती च म इंद्रश्च मे पूषा च म इंद्रश्च मे बृहस्पतिश्च म इंद्रश्च मे मित्रश्च म इंद्रश्च मे वरुणश्च म इंद्रश्च मे त्वष्टा च म इंद्रश्च मे धाता च म इंद्रश्च मे विष्णुश्च म इंद्रश्च मेऽश्विनौ च म इंद्रश्च मे मरुतश्च म इंद्रश्च मे विश्वे च मे देवा इंद्रश्च मे पृथिवी च म इंद्रश्च मेऽन्तरिक्षं च म इंद्रश्च मे द्यौश्च म इंद्रश्च मे दिशश्च म इंद्रश्च मे मूर्धा च म इंद्रश्च मे प्रजापतिश्चम इंद्रश्च मे स्वाहा ॥६॥

चमकम् ॥७॥

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे स्वाहा ॥७॥

चमकम् ॥८॥

इध्मश्च मे बर्हिश्च मे  वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे  वायव्यानि च मे पूतभृच्च

म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे स्वाहा ॥८ ॥

चमकम् ॥९ ॥

अग्निश्च मे धर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्टया बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् स्वाहा ॥९ ॥

चमकम् ॥१० ॥

गर्भाश्च मे  वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाच्च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां  प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां आत्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् स्वाहा ॥१० ॥

चमकम् ॥११ ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे

त्रयस्त्रिꣳशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चाऽऽन्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च स्वाहा ॥११ ॥

॥शांतिपाठ ॥

हरिः ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शꣳसिषद् विश्वेदेवाः सूक्तवाचः पृथिवी मातर्मा मा हिꣳसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोऽनुमदन्तु ॥

॥ॐ शांतिः शांतिः शांतिः ॥

॥पूर्णाहुति ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात पूर्णमुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ सर्वम् वै पूर्णꣳ स्वाहा

ॐ सर्वम् वै पूर्णꣳ स्वाहा

ॐ सर्वम् वै पूर्णꣳ स्वाहा

॥ॐ शांतिः शांतिः शांतिः ॥

॥ श्री अक्कलकोट स्वामी समर्थ चरणारविंदार्पणमस्तु ॥

टीप - वरील रुद्रपाठ हवनासाठी आहे. अभिषेक करताना स्वाहा गाळावा.